International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 140-142
© 2026 IJMH
www.themultijournal.com
Received: 12-02-2026
Accepted: 24-02-2026
Publish : 25-02-2026

**Dr. G. Suresh**
Assistant Professor in Sanskrit Sahitya,
The Madras Sanskrit College,
Mylapore, Chennai - 60004

**Correspondence:**
**Dr. G. Suresh**
Assistant Professor in Sanskrit Sahitya,
The Madras Sanskrit College,
Mylapore, Chennai - 60004

# साहित्य-शैवतन्त्रयोः विद्यमान-नृत्यविषयसमीक्षा

**Dr. G. Suresh**

साहित्यशास्त्रं शैवागमश्च परस्परं निगूढतया सम्बद्धौ वर्तेते, विशेषतः काश्मीरशैवदर्शनस्य 'प्रत्यभिज्ञा' सिद्धान्तेन सह। आचार्याः अभिनवगुप्तपादाः ध्वन्यालोकलोचने अभिनवभारत्यां च एतन्मतं प्रस्थापितवन्तः यत् काव्यरसः साक्षात् 'शिवतत्त्वस्य' आनन्दस्वरूपः एव अस्ति। यथा शैवागमे आत्मा स्वशक्तिं विस्मृत्य पुनः प्रत्यभिज्ञया शिवत्वं प्राप्नोति, तथैव काव्यश्रवणेन सहृदयः लौकिकप्रपञ्चं विस्मृत्य 'विगलितवेद्यान्तर' इति अवस्थामासाद्य ब्रह्मानन्दसहोदरं रसानन्दं विन्दति। अतः साहित्यशास्त्रस्य 'रसध्वनिः' वस्तुतः शैवागमस्य 'चित्-शक्ति-विमर्श' सिद्धान्तस्यैव वाङ्मयी अभिव्यक्तिः अस्ति। साहित्यशास्त्र-शैवागमयोः बान्धव्यं सुनिश्चितं ज्ञायते इत्यनेन, उभयोरपि शास्त्रयोः मिथः संबन्धत्वं दरीदृश्यते। शैवागमे उत्सवसमये नृत्यप्रयोगः दृश्यते। तद्वत् साहित्येऽपि नाट्यनृत्यविषयाः प्रोक्तं भवति धनञ्जयाचार्यैः दशरूपके। अतः उभयत्रापि नृत्यसंबन्धविद्यमानत्वात् विषयोऽयं पत्रेऽस्मिन् प्रस्तूयते।

काव्यं नाम रसभावालङ्कारपूर्णं जनमनोह्लादकं वाक्यकदम्बकम् इत्यशेषविपश्चिज्जनगणम-णिविदितमेव। काव्यं दृश्यश्रव्यभेदाभ्यां द्विधा भवति । काव्यमधिकृत्यार्वाचीनैरानन्दवर्धनाचार्य-भामह-दण्डि-राजानककुन्तक-मम्मटादिसङ्ख्यातीतैराचार्यप्रवरैः नानालङ्कारग्रन्थाः निरमायिषत। परन्तु काव्यशास्त्रमधिकृत्य त्रय एवाचार्याः विश्रुतिमापुः - व्यासमुनिर्नन्दिकेश्वरः भरतमुनिश्च। काव्यशास्त्रं न केवलं दृश्यश्रव्यकाव्यप्रमेयोपपादकं भवति। अपि तु तदुपयोगिनां रससङ्गीतकामशास्त्रप्रभृतीनां सौकुमार्यकलादीनाञ्च निरूपणाधिकृतं भवति।

इदंशास्त्रस्याचार्यत्वेन भरतमुनिपूर्ववर्ती नन्दिकेश्वरः इति सहृदयैरङ्गीक्रियते । परन्तु सांप्रतं लोके नाट्यविषयस्याकरग्रन्थत्वेन समुपलब्धं भरतनाट्यशास्त्रमेव भवति। एवं नाट्यशास्त्रे कर्तृत्वेन वृद्धभरतः आदिभरतश्च गृह्येते । नाट्यवेदागम-नाट्यशास्त्रभेदाभ्यां तच्छास्त्रग्रन्थद्वयं भवति। तत्र नाट्यवेदाग-मग्रन्थसङ्ख्या द्वादशसाहस्री, नाट्यशास्त्रस्य षट्साहस्री। भावप्रकाशनं नाम ग्रन्थे एवं भवति -

**एवं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः।**
**षड्भिः श्लोकसहस्रैर्यो नाट्यवेदस्य सङ्ग्रहः॥**[1]इति।

परन्तु भरतनाट्यशास्त्रस्य दुरूहत्त्वादनेकविषयचयविप्रकीर्णत्वाद्रूपकमधिकृत्य नैकविद्वद्भिः परा-क्रान्तम्। तत्र धनञ्जयाचार्येण दशरूपकं नाम ग्रन्थः, तदनुजेन धनिकाचार्येणावलोकव्याख्या चाकारिषाताम्। तद्रीत्या नृत्यलक्षणादिकमवगन्तुं नाट्य-नृत्य-नृत्तभेदविषयादिज्ञानमत्यावश्यकम्।

**जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसमाथर्वणादपि॥**[2]

इत्यभियुक्तोक्तिप्रकारं नाट्यं वेदत्वेन परिगण्यते । तदनु " **अवस्थानुकृतिनाट्यम्**"[3]इति काव्यो-पनिबद्धायाः धीरोदात्तादिचतुरवस्थायाः आङ्गिक-वाचिकाहार्य-सात्त्विकादि चतुर्विधाभिनयेन एक-रूपताप्रतीतिजनकमनुकरणं नाट्यम्। एवं भरताचार्यः स्वकीयनाट्यशास्त्रे -

**योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।**
**सोऽङ्गाद्यभिनयैर्युक्तं नाट्यमित्यभिधीयते॥**[4]

इति समीरयति। साहित्यमर्मज्ञः अभिनवगुप्तपादास्तु लौकिक-पदार्थव्यतिरिक्तं वृत्तान्तास्वादनरूप-संवेदनसंवेद्यं वस्तु रसस्वभावं नाट्यम् इति कथयन्ति। किञ्च, धनञ्जयाचार्यैः निजग्रन्थे एवमुच्यत - नटादौ रामाद्यवस्थायाः आरोपणप्रवृत्तत्वात् रूपकं यथा मुखचन्द्रः इत्यत्र मुखे चन्द्रत्वारोपेण रूपारोपात्तु रूपकमिति रूपकालकारः भवति । अत्र नाट्य-रूप-रूपकशब्दाः एकस्मिन्नेव नाट्येऽर्थे प्रयुक्ताः सन्ति यथा इन्द्रः-पुरन्दरः-शक्रः इति शब्दास्त्रयोऽपि इन्द्रबोधकाः एकार्थवाचिनः, परन्तु तेषामपि विशेषप्रवृत्तिनिमितभेदः भवति, तथैव नाट्य-रूप-रूपकशब्देष्वपि विद्यते।

किञ्च नाट्ये - नटे रामादिपात्राणामवस्थाया आरोपात् नाट्यं रूपकमेव । एवमवस्थानुकरणत्वाद्दृश्यकाव्यं नाट्यम्। तदेव दृश्यत्वात् रूपं - नटे रामादेरारोपाद्रूपकमित्यभिधीयते। धनिका-चार्यस्यापि एवमेवाभिप्रायः। तस्मात् रसाश्रयं नाट्यं नाटकं वा भवति। एवं "**अन्यद्भावाश्रयं नृत्यम्**"[5]इति कारिकांशतः नृत्यं नाट्यादन्यदेवेत्यभिप्रयन्ति धनञ्जयाचार्याः । तत्र रसाश्रयना-ट्यादितरत् यत् भवति तद्भावाश्रयं नृत्यमिति कथ्यते। भावप्रकाशने ग्रन्थे एवं भवति -

**भावस्स्याद्भावनं भूतिरथ भावयतीति वा।**
**पदार्थो वा क्रिया सत्ता विकारो मानसोऽथवा ॥** (१-१२)

इति । एवमेव सङ्गीतदामोदरे -

**देवरुच्या प्रतीतो यस्तालमानरसाश्रयः।**
**सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः॥**

इति कथ्यते।

एवं स्थिते डोम्बी - श्रीगदित - भाण - भाणीप्रस्थान- रासकका-व्यादयः सप्त नृत्यस्य भेदाः भाणवत्स्युः इत्युक्तेः तेषां मध्ये भाणस्य दशविधरूपके ग्रहणादितरभेदानां रूपकत्वं किमर्थं न भवेत् इति रूपकान्तरसत्वाद्रूपकदशविधावधारणाया अनुपपत्तिर्भवेत् इति कारणात् तद्बोधार्थं नाट्यनृत्ययोः एवं नृत्तभेदः च दशरूप-ककारैरेवमुच्यते।

यद्यद्रसात्मकं तत्तद्वाक्यार्थाभिनयात्मकम् । यद्यद्भावाश्रयं तत्तत्प-दार्थाभिनयात्मकम् इति ज्ञायते। एवमिदमवधेयम् - नाट्यं नटकर्म - नृत्यं नर्तककर्म भवति। अभिनवगुप्तपादोऽपि नटः प्रयोक्ता सन् प्रयोज्यस्य रूपं धरति - परन्तु नर्तक एवं न करोति - तस्मान्नटः नर्तकाद्भिन्नः इति मनुते। एवमेव नृत्यनृत्तयोः गात्रविक्षेपादौ समानेऽपि पदानुकारात्मकं नृत्ये दृश्यतेताललयाश्रयनृत्ते तन्नास्ति।

एवं "**नट अवस्पन्दने**"[6](अवस्पन्दनं नाम किञ्चिच्चलनमित्यर्थः) इति धातोः ष्यञ्प्रत्यये कृते नाट्यम् इति रूपं - ण्वुल् प्रत्यये कृते नाटकम् - कृतेऽचि नटः - ल्युट्प्रत्यये नटनम् इति रूपं सिद्ध्यति । एवं "**नृती गात्रविक्षेपे**"[7] इति धातोः क्यप्प्रत्यये कृते नृत्यं इति रूपं - क्तप्रत्यये नृत्तं - ल्युटि नर्तनं - ण्वुलि नर्तक इति रूपम् - अच्प्रत्यये नर्तः इति रूपं सिद्ध्यति।

किञ्च, वाक्यार्थाभिनयः नाट्ये रसाश्रयत्वात्, नृत्ये पदार्थाभिनयः भावाश्रयत्वात्, नृत्तेऽभिनयाभावः ताललयाश्रयत्वात्। एवं नाट्ये किञ्चिच्चलनमेवेति विद्यमानकारणात् सात्विकं बाहुल्यमस्ति। नृत्ये गात्रविक्षेपादाङ्गिकं बाहुल्यम्। नृत्तेऽपि गात्रविक्षेप एवाङ्गिकं बाहुल्यं किन्त्वभिनयहीनता। एवमपि नाट्यं काव्यात्मकं भवतीति कारणेन श्रोतुमवलोकयितुं च शक्यम्। नृत्यं दर्शनीयमेव, न तु श्रवणीयं काव्यसंबन्धाभावात् । एवमेव नृत्तमपि।

तस्माद्धेतोः श्रीगदितादयः नृत्यभेदाः भवन्ति, न तु नाट्यभेदाः । तेन नाट्येऽऽस्वादनं भवति, नृत्य आह्लादनं, नृत्ते तु मनोरञ्जनम्। किञ्च रसपूर्वावस्था भावाः - भावपूर्णावस्था रसाः भवन्ति। भेदापगमे सत्यपि उद्बुद्धमात्रो भवति भावः, परिपुष्टो भवति रसः इति निश्चप्रचं भवति । नाट्ये कथापात्राणां सर्वाङ्गीणचित्रणेन रसपरिपुष्टतायाः भावचरमपरिपोषणावधिः दृश्यते, नृत्ये तु भावाभिव्यञ्जना एव। नृत्ते चञ्चत्पुटादि तालानुसारेण मात्रानुसरणं लयानुसारेण गतिः, एवं ताललयनियमितगात्रविक्षेपमात्रं भवति। तस्मान्नृत्तं गानक्रियमात्रानुसारि, वाद्यतालानुसारि च भवति।

साहित्यशास्त्रे नृत्यविषयकथनावसरे धनञ्जयाचार्यैः नाट्य-नृत्य-नृत्तभेदादिकं संप्रोच्यते। परन्तु शैवागमे 'नृत्त'शब्देन नृत्यमेवाश्रियते। तत्र पद्धतिकाराः अपि प्रमाणभूताः, मूलागमाः अपि प्रमाणभूताः भवन्ति। अतः 'नृत्त'शब्देन रुद्रगणिकास्त्रीभिः क्रियमाणं नृत्यमेव स्वीक्रियते। यतः देवधाम्नि नित्योत्सव-नैमित्तिकोत्सव-विशेषोत्स-काम्योत्सवादयः विद्यन्ते। तत्र काम्योत्सवं विहाय इतरत्रिषूत्सवेषु नृत्यप्रयोगाः विहिताः इति आगमेषु दृश्यते।

अयमेव विषयः गीतवाद्यनृत्यतौर्यत्रिकविलासविख्यातकमलालयरा-जितश्रीत्यागराजमधिकृतय कृतौ 'श्रीत्यागराजस्य' इति गीतिमणौ श्रीमुत्तुस्वामिदीक्षितवर्येण गीतमेवम्– **विमलरुद्रगणिकानर्तन-विनोदभेदमोदकरस्य**[8]-इति। कमलालये रुद्रगणिकाणां नाट्यमत्र सूच्यते ततः तासां प्रामुख्यञ्च ज्ञायते। ताः स्वजीवनं संपूर्णतया परमेश्वरे नाट्याञ्जल्यर्थं अर्पितवत्यः भवन्ति । सुन्दरमूर्तिस्वामिनः धर्मपत्नी रुद्रगणिकाकुलोद्भवा एव आसीत्। उक्तं स्वयं परमेश्वरेण -

**जातिस्मरा भव त्वं च मद्भक्त्या च विशेषतः ।**
**कमलालयमासाद्य लिङ्गालयमनुत्तमम् ॥**
**गाननृत्तपरा साध्वी सुन्दरेणामुना सह ॥**[9]

इति कैलासे, गाननृत्तपरा भव इति प्राप्तेश्वरादेशा कमलिनी कमलालये जनित्वा नृत्यकैङ्कर्यमग्राऽभूत्।

आगच्छन्ति परमात्मनः वक्त्रेभ्यः इति आगमशब्दविषये वीरोत्त-रागमोक्तदिशा आगमोक्तपूजैव श्रेष्ठा विधातव्या इति ज्ञायते।

कामिकागम-कपर्धिसंहितयोः वचनं बलात् तन्त्रोक्तमार्गः एव कलावस्मिन् मुख्यः भवतीति वेद्यते। तदुक्तं -

**आगमोक्तप्रकारेण प्रतिष्ठा लिङ्गपूजनम्।**
**कलौ तन्त्रोदिताः मन्त्राः सिद्धास्तूर्णफलप्रदाः॥**
**शस्ताः कर्मसु सर्वेषु जययज्ञक्रियादिषु।**
**निर्वीर्याः श्रैतजातीयाः विषहीना इवोरगाः॥**[10]

इति। अतः आगमतन्त्रोक्तप्रकारेणैव विषयाः स्वीकर्तव्याः इत्यस्मात्, नृत्यविषया अपि आगमेषु कथितत्वात्, देवालयेषु नृत्यप्रयोगः आचर्यते।

सूक्ष्मागमे महोत्सवविधिपटले ध्वजारोहणे नवसन्धिकरणवेलायां प्रतिसन्धि एकः रागः एकः तालः एकं नृत्यञ्च प्रदर्शनीयं देवताराधनार्थम्।

प्रथमं प्रोक्षणादिसर्वं विधाय, संपूज्य, नैवेद्यार्थं बलिं दत्वा, तदनन्तरमिदमुच्यते –

**तालः - ब्रह्मतालः; रागः - वकुलम्; नृत्यं - समपादम् (समपादनाम नृत्यमत्रोपयोक्तव्यमिति नियमः) पाणिपञ्चमं पाद्याङ्गुच्छपुटम् - इत्यादिभिःसन्तोष्य**[11]-इति प्रतिदिशमेवङ्कर्तव्यमिति भिन्नभिन्न-रूपेण भिन्नभिन्नरागतालनृत्यैः तत्तद्दिग्देवताः आराधनीयाः इत्यनेनेदं ज्ञायते यत्, नृत्यप्रयोगः आगमेष्वपि सुप्रसिद्धः भवतीति। एवं सर्वत्रापि गीत-ताल-नृत्यादि-त्रिविधप्रयोगः आगमेष्ववलोक्यते, तन्त्रोक्तदिशा तदनुष्ठीयते च।

**बलिभेरसमायुक्तं सर्वातोद्यसमन्वितम्।**
**वृषादिपरिवाराणां बलिं दद्यात् स्वनामतः॥**[12]

इत्युक्तप्रकारेण गीत-नृत्य-वाद्यघोषैः वृषभादिपरिवाराणाङ्कृते तत्तन्मन्त्रैः बलिं दद्यात् इत्युक्तम्। नित्यपूजासमये पूर्वाद्यष्टदिक्षु अथवा ब्रह्मस्थानेषु कर्तव्यमिदमितीरितम्। तत्पूर्वं वाद्यादिकं प्रणम्य एवोपयोक्तव्यम्। एतादृशमर्यादापि प्रोच्यते आगमे।

एवं सुप्रभेदागमे –

**शब्ददुन्दुभिर्निर्घोषैर्गीतनृत्यसमाकुलम्।**
**सर्वालङ्कारसंयुक्तं त्रिशूलेन समन्वितम्॥**[13]

इत्युक्तरीत्या शब्ददुन्दुभिवाद्यैः गीतनृत्यैश्चेश्वरः स्तुत्यो भवतीति सुवेद्यते।

साहित्यशास्त्रदिशा नाट्यनृत्यविषयादिकं सविचारपूर्वकं निर्दिष्टम्। तत् प्रयोगरूपेण नृत्यादिप्रयोगः, गीतिवाद्यविषयाश्च शैवतन्त्रे प्रयु-ज्यन्ते इति विशेषांशोऽयम्।

## उद्धृतविषयसूची

1. भावप्रकाशनम् १०.३४
2. नाट्यशास्त्रम् १.१७
3. दशरूपकम् १.७
4. नाट्यशास्त्रम् १.१२१
5. दशरूपकम् १.१२
6. बृहद्धातुकुसुमाकरः १०.१५४५
7. तत्रैव ४.१११६
8. श्रीमुत्तुस्वामिदीक्षितकृतयः कृति सङ्ख्या ४१६
9. शिवरहस्यम् ९.१९.२२-२३
10. विजयोत्तरसंहिता, पु. ७२
11. सूक्ष्मागमः पु. १६७
12. तत्रैव १७७
13. सुप्रभेदागमः, महोत्सवविधिः, ७५

## उपकृतग्रन्थसूची


1. भावप्रकाशनम्, Oriental Institute, Baroda, 1968
2. नाट्यशास्त्रम्, Nirnaya Sagar Press, Bombay, 1942
3. विजयोत्तरसंहिता, Shrimat Srikanta Sivacharya Reseatrch Institute, Karaikal, 2012
4. सूक्ष्मागमः,Thirunavukkarasu Charitable Trust, Coimbatore, 2004
5. सुप्रभेदागमः, Śivāgama siddhānta paripalana saṅgham, Devakottai,
6. शिवरहस्यम्, Thanjavur Saraswati Mahal Library, Thanjavur, 2007
7. दशरूपकम्, साहित्य भण्डार्, मेरठ, १९६९
8. ध्वन्यालोकः, चौखम्बा संस्कृत सीरिज् आफिस्, वाराणसी, १९४०
9. बृहद्धातुकुसुमाकरः, चौखबा संस्कृत प्रतिष्ठान, दिल्ली, २००७
10. Sri Muthuswami Dikshitar Keerthanaigal, Music Book Publishers, Chennai, 2005